# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

कक्षा- आचार्य-२ | प्रश्नपत्रम् –२ | गुणाः – ७०

विषयः – नव्यन्यायः | सत्रम्- ४ (New) | समयः- ११:३० तः २:३०

दिनाङ्कः – २७/०३/२०२० | सन्दर्भग्रन्थः – न्यायकुसुमाञ्जलिः

---

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्नः – १ अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या ।** ०५

१ "भगवति भवे सन्देह एव कुतः" इति पङ्क्तिं व्याख्यात।

२ "तदिह पञ्चतयी विप्रतिपत्तिः" इति पङ्क्तिं उपपादयत।

**प्रश्नः - २ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु।** १०

१ मङ्गलश्लोकं विलिख्य तस्य ग्रन्थपरतया कुसुमाञ्जलिपरतया च व्याख्यां कुरुत।

२ न्यायचर्चेयमीशस्येति कारिकां सप्रसङ्गं व्याख्यात।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्नः – ३ अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या।** ०५

१ हेतुभूतनिषेधो न स्वानुपाख्यविधिर्न च।
स्वभाववर्णना नैवमवधेर्नियतत्वतः।। इति कारिकां व्याख्यात।

२ तृणारणिमणीनां कथं वह्निकारणत्वमिति उपपादयत।

**प्रश्नः – ४ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु।** १०

१ यथाग्रन्थं शक्तिमाशङ्क्य निराकुरुत।

२ कार्यकारणभावव्यवस्थापनम् ग्रन्थोक्तदिशा कुरुत।

**तृतीयान्वितिः (Unit 3)**

**प्रश्नः – ५ अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या।** ०५

१ प्रतिबन्धकपदार्थनिर्वचनं यथाग्रन्थं प्रतिपादयत।

२ उपलक्षणस्य कारणत्वाभावे युक्तिं प्रदर्शयत।

**प्रश्नः – ६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु।** १०

१ यथाग्रन्थं अदृष्टं पुरुषनिष्ठमेवेति साधयत।

२ संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः।
स्वगुणाः परमाणूनां विशेषः पाकजादयः।। इति कारिकां व्याख्यात।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः – ७ एकस्य उत्तरं सन्दर्भसहितं देयम् ।** ०५

१ न वैजात्यं विना तत् स्यान्न तस्मिन्ननुमा भवेत्।
विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना।। इति कारिकां व्याख्यात।

२ नित्यविभोः कारणत्वशङ्कां प्रतिपादयत।

**प्रश्नः – ८ एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ क्षणभङ्गवादस्य खण्डनं यथाग्रन्थं विवृणुत।

२ पूर्वभावो हि हेतुत्वं मीयते येन केनचित्।
व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा न हि।। इति कारिकां व्याख्यात।

**प्रश्नः – ९ दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु।** १०

१ मनीषिणः किं स्वर्गापवर्गयोः मार्गं मन्यन्ते?

२ किमर्थं बहुशः श्रुतेरपि भगवान् निरूप्यते?

३ सापेक्षत्वाद् इत्यस्य कोर्थः?

४ प्रवाहः आदिरुत अनादिः?

५ मीमांसकमते प्रोक्षणादिजन्यसंस्कारः कुत्र जायते?

६ यागस्यैव स्वर्गादिहेतुत्वं कुतो नाङ्गीक्रियते?

७ न्यायमते प्रतिबन्धकं नाम किम्?

८ किमर्थं देवताप्रतिमादिकं पूर्वभाग् भवति?

९ सांख्यमते पुरुषः कीदृशः?

१० सांख्यमते कर्तृत्वादिकं कस्य धर्मः?

११ कुसुमाञ्जलिग्रन्थस्य कर्ता कः?

१२ कुसुमाञ्जलिग्रन्थस्य प्रधानविषयः कः?

१३ “भावो यथा तथा” इति कारिकां पूरयत।

१४ सांख्यमते कति तत्वानि वर्तन्ते?

१५ शून्यवादिनः के?

**************************